National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2018; 1(20): 80-82
© 2018 NJHSR
www.sanskritarticle.com

**Dr. G. Veera Brahmam**
Lecturer in Sanskrit,
Dept.of Sanskrit,
NRI Junior College, Guntur, A.P

**Correspondence:**
**Dr. G. Veera Brahmam**
Lecturer in Sanskrit,
Dept.of Sanskrit,
NRI Junior College, Guntur, A.P

# व्यक्तित्वविकासे कर्णभारोपदेशः

**Dr. G. Veera Brahmam**

### संस्कृतवाङ्गमयम्

संस्कृतवाङ्मयं तु सर्वासां लौकिकानां विद्यानाञ्च भाण्डागारः। वाङ्मयमिदं गद्यपद्यमयमिति सर्वत्र परिदृश्यन्ते। अर्थात् संस्कृतकाव्यं द्विविधम्। तच्च दृश्यं श्रव्यमिति ख्यातम्।

दृश्यश्रव्यकाव्यभेदयोरानन्ददायकत्वे उपदेशकरणे वा श्रव्यादपि दृश्यं रमणीयम्। दृश्यकाव्यमेव रूपकमुच्यते। कथाश्रितं रूपं रूपकमित्यर्थः। संस्कृतसाहित्ये शाखान्तरेभ्यः दशरूपकम् उत्तमम्। **"सन्दर्भेषु दशरूपकम् श्रेयः"**[1] इति वामनाचार्येण स्पष्टम् उक्तम्। रूपकेष्वपि **"अन्येषां प्रकृतित्वात् भूयो रस परिग्रहात् सम्पूर्णलक्षणत्वात्"**[2] च नाटकमुत्तमम् इति आलङ्कारिकाणां मतम्। संस्कृतसाहित्ये प्रसिद्धकालिदासादपि भासः प्राचीनः इति पण्डितैः उक्तम्। अतः भासः नाटकचक्रवर्ती इति लोकोक्तिः। एषः रामायण-भारतोदयन-लोककथाः आश्रित्य त्रयोदशरूपकाणि विरचितवान् । एषु नाटकेष्वपि कर्णभारम् नाटकं उत्तमोत्तमम् ।

### किं नाम साहित्यम्

सम्यक् वर्णयति गमयति वा इत्यर्थे हि-गतौ (स्वादि परस्मैपदि अनिट्) इति धातोः **आदिकर्मणि क्तः कर्तरि च**[3] इति सूत्रेण क्त प्रत्यये हितम् इति रूपम्। सम्यक् हितं इत्यर्थे हितेन सहितम् इति वा विग्रहे सः शव्देन समासे सहितम् इति रूपम्। सहितः शब्दः, सहितोऽर्थः, सहितश्च सहितश्च सहितौ, सहितयोः भावः कर्म वा साहित्यम्। सहित शब्दात् पूर्वनिष्पादितात् **गुणवचन ब्राह्मणादिभ्यश्च कर्मणि च**[4] इति सूत्रेण ष्यञ् प्रत्ययः। अपारे अस्मिन् साहित्ये मानविकासस्य सर्वाणि तत्वानि, व्यक्तित्वविकास बोधकानि अन्तर्निहितानि सन्ति ।

### किं नाम व्यक्तित्वम्

सामान्यतया व्यक्तेः विकासः नाम व्यक्तित्वस्य सर्वाङ्गीणविकास एव। व्यक्तित्वस्य सर्वाङ्गीणविकास इत्युक्ते सर्वेषामपि आचार-व्यवहार-कर्तव्यपरायणतानुशासनोत्साहादीनां समन्वितस्वरूपम् । यस्यां व्यक्तौ एते सर्वे गुणाः परिदृश्यन्ते समाजे तस्य व्यक्तित्वं देदीप्यते ।

### कर्णभारस्य नामसार्थक्यम्

महाभारतयुद्धे द्रोणाचार्यस्य मरणानन्तरं कौरवसेनायाः सर्व दायित्वं कर्णस्योपरि न्यस्तमर्तत। तस्मादेव कारणात् रूपकस्य नाम कर्णभारम् इति प्रसिद्धम्। भासकविना महाभारतकथमाश्रित्य विरचितषड्रूपकेषु कर्णभारम् इति अङ्काख्यं रूपकम् अन्यतमम्।

अस्मिन् कर्णभाररूपके यानि व्यक्तिविकासविषयकतत्वानि समुपर्वणितानि तानि अत्र उपस्थाप्यन्ते। भासः मध्यवर्गीयेषु दुर्योधन – शल्य - कर्णादिषु पात्रेषु औदात्त्यं रसाभिव्यक्तित्वञ्च प्रत्यारोप्य तान् वीररसपूर्णनायकत्वेन चित्रितवान्। कर्णभारेस्मिन् करुणरसः-वीररसः च मिश्ररूपेण अनुभूयेते ।

**रूपके कर्णः**

**उत्साहः** - रूपकेऽस्मिन् प्रारम्भे कर्णः विद्यामानास्वपि उत्साहः सर्वासु प्रतिकूलावस्थासु स्वकीयं कर्तव्यपरायणत्वम् उत्साहञ्च प्रदर्शयति, येन तस्य व्यक्तित्वं सम्यक्तया अवगन्तुं शक्यते। प्रति आगच्छन्तं कर्णं दृष्ट्वा प्रारम्भे भटः भाषते - **भटः – "भोः किं नु खलु युद्धोत्सवप्रमुखस्य दृष्टपराक्रमस्य अभूतपर्वहृदयपरिमतापः"।** मानसिकसन्तप्तः शोकभिभूतः कर्णः स्वकीयं वीरत्वं प्रदर्श्यं तदानीं कथयति –

**मा तावन्मम शरमार्गलक्ष्यभूताः सम्प्राप्ताः क्षितिपतयः सजीवशेषाः।**
**कर्तव्यं रणशिरसि प्रियं करुणां द्रष्टव्यो यदि स भवेद्धनञ्जयो मे।।**[5]

श्लोकेऽस्मिन् कर्णस्य उत्साहशक्तिः, शौर्यं, कार्यकुशलता, प्रतापः, स्मृतिश्च ज्ञायते। स्वस्वामिनः कृते कर्णेन दर्शितः उत्साहः वीरधर्मस्य पोषकः।

**वीरत्वम्**

कर्णः स्वगुरोः शापवृत्तान्तं शल्यः श्रावयति। गुरोः शापानुसारं अस्त्रपरिचालने निष्फलतां च प्राप्नोति। तथापि युद्धक्षेत्रात् विरतो न भवति। कर्णः वीरपुरुषः इव स्वकीयं वीरत्वं प्रदर्श्यं स्वयं कथयति।

**हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।**
**उभे बहुमते लोके नास्ति निष्फलता रणे।।**[6]

**भ्रातृत्वम्**

पाण्डवाः अनुजाः इति स्वमातुः सकाशात् ज्ञातवान्। भ्रातृभिः सह युद्धं शास्त्रविरुद्धं कदापि न करणीयम्, भ्रातरः पितेव पालनीयाः इति मनुवचनमपि एषः स्मृतवान्।

**पितेव पालयेत् पुत्राज्येष्टो भ्रातृन्यवीयसः।**[7]

तथापि स्वमित्रस्य हितार्थं तैः सह युद्धं कृत्वा स्वकर्तव्यं सम्पादितवान्। यथा कर्णः युद्धार्थं रथारूढः सन् अग्रे गच्छति, तदानीं विधिरपि प्रतिकूलाम् अवस्थां जनयति।

**दातृत्वम्**

अर्जुनस्य पिता इन्द्रः स्वपुत्रस्य रक्षार्थं ब्राह्मणवेषेण आगत्य भिक्षां याचते। तदानीं कर्णः पूज्यतमाः खलु ब्राह्मणाः इति मत्वा तं शक्रं नमस्करोति। तदानीम् इन्द्रः – सूर्यः – चन्द्रः – सागर - हिमवन्त इव तिष्टतु ते यशः इति आशीर्वादं ददाति। परन्तु किमं न वक्तव्यं दीर्घायुर्भवति इति कर्णः उक्त्वा अलम् एतदेव शोभनम् इति-

**धर्मो हि यत्नैः पुरुषेण साध्यो भुजङ्गजिह्वचपला नृपश्रियः।**
**तस्मात्प्रजापालनमात्रबुद्ध्या हितेषु देहेषु गुणाः धरन्ति।।**[8]

अनन्तरं ब्राह्मणरूपेण विराजमानाय इन्द्राय गोधनम्, अश्व-हस्ति-कनक-पृथिव्यग्निष्टोमयज्ञफलं सर्वमपि दानरूपेण दातुं कर्णः इच्छति। सर्वान्तिमे स्वप्राणरक्षणार्थं विद्यमानमेकमात्रं साथनं कवचकुण्डलमपि ब्राह्मणवेषधारिणे इन्द्राय प्रीत्या समर्पितवान्। तदुक्तम्-

**अङ्गैः सहैव जनितं मम देहरक्षा-**
**देवासुरैरपि न भेद्यमिदं सहास्त्रैः।**
**देयं तथापि कवचं सह कुण्डलाभ्यां-**
**प्रीत्या मया भगवते रुचितं यदि स्यात्।।**[9]

तस्मिन् समये शल्यः न दातव्यं न दातव्यम् इति उक्ते सति कर्णः सानन्दं प्रयच्छन् भाषते-

**शिक्षा क्षयं गच्छति कालपर्ययात्-**
**सुबुद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति-**
**हुतं च दत्तं च तथैव तिष्ठति।।**[10]

अनेन तस्य दानवीरता ज्ञायते।

**सहिष्णुता**

शक्रेण वञ्चितः भवान् इति शल्यः कथयति। तदानीम् अहं न वञ्चितः साक्षात् देवलोकाधिपतिः इन्द्रः एव मया वञ्चितः इति कथयति- मया कृतार्थः खलु पाकशासनः। कर्णस्य दानशीलतागुणेन पश्चात्तापमनुभूय साक्षात् इन्द्रोऽपि विमलानामकम् एकममोघमास्त्रं देवदूतद्वारा प्रेषयति । तथापि धिक् दत्तस्य न प्रतिगृह्णामि इति दत्तस्य जनस्य प्रतिग्रहणं नेच्छति।

**कर्णभारस्य विहङ्गवीक्षणम्**

एवं रूपकेऽस्मिन् कर्णः एकः प्रख्यातयोद्धरूपेण चित्रितः। तस्य व्यक्तित्वसन्दर्भे कानिचन तत्त्वानि अधः उपस्थापयितुं शक्यन्ते यथा –

1. प्रतिकूलास्वपि अवस्थासु स्ववीरत्वं प्रदर्शयति।
2. पाण्डवाः मम अनुजाः इति मातुः सकाशात् ज्ञात्वाऽपि स्वमित्रस्य कृते कार्यं सम्पादयति। अत्र सः मित्रस्य कृते अधिकं प्राधान्यं ददाति।
3. ब्राह्मणानां कृते सम्मानं प्रदर्श्यति।
4. स्वकीयं सर्वस्वमपि दातुम् उत्सुकः दृश्यते। यथा दूतवाक्यरूपके नायकः श्रीकृष्णः दयावीरः तथा कर्णभाररूपके नायकः कर्णः दानवीरः। अतः लोकेस्मिन् दानवीरसूरकर्णः इति सूर्य-चन्द्र-सागर-हिमवत्पर्यन्तं प्रसिद्धिः वर्तते। अतः कर्णस्य सर्वे गुणाः संसारस्य सर्वैः जनैः अनुकरणीयाः। अनेन तेषां व्यक्तित्वं सफलतायाः चरमचीम्नि उपनीतम् भविष्यति।

**उपयुक्तग्रन्थसूची**


1. काव्यालङ्कारसूत्रवृत्तिः, प्रथमाधिकारणे, तृ. 30 सूत्रे
2. दशरूपकम्, तृतीयप्रकाशः, 1 कारिका
3. वैयाकरणसिद्धान्तकौमुदि - 3 - 4 - 71, चौकाम्बा अमरभारती प्रकाशन, वारणासी, 1997
4. वैयाकरणसिद्धान्तकौमुदि - 5 - 1-104, चौकाम्बा अमरभारती प्रकाशन, वारणासी, 1997
5. कर्णभारम् - श्लोक.सं. 4, भासनाटकचक्रम्, चौकाम्बा अमर-भारती प्रकाशन, वारणासी
6. कर्णभारम् - श्लोक.सं. 23, भासनाटकचक्रम्, चौकाम्बा अमर-भारती प्रकाशन, वारणासी
7. मनुस्मृतिः - 108, बालसरस्वति पब्लिकेषन्,विजयवाडा
8. कर्णभारम् - श्लोकः. 17, भासनाटकचक्रम्, चौकाम्बा अमर-भारती प्रकाशन, वारणासी
9. कर्णभारम् - श्लोक. 21, भासनाटकचक्रम्, चौकाम्बा अमरभारती प्रकाशन, वारणासी
10. कर्णभारम् - श्लोकः.22, भासनाटकचक्रम्, चौकाम्बा अमर-भारती प्रकाशन, वारणासी